# Shri Hanumat Kavacham

# શ્રીહનુમત્કવચમ્

## Document Information

Text title : hanumat_kavacham

File name : hanumatkavachaAnanda.itx

Category : kavacha, hanumaana, vAlmIki, hanuman

Location : doc_hanumaana

Author : Valmiki

Transliterated by : Antaratma antaratma at Safe-mail.net

Proofread by : Antaratma, PSA Easwaran

Description-comments : from Anandaramayana

Latest update : May 28, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 28, 2021

*sanskritdocuments.org*

# શ્રીહનુમત્કવચમ્

શ્રીરામદાસ ઉવાચ -
એકદા સુખમાસીનં શઙ્કરં લોકશઙ્કરમ્ ।
પપ્રચ્છ ગિરિજાકાન્તં કર્પૂરધવલં શિવમ્ ॥ ૧॥

પાર્વત્યુવાચ -
ભગવન્ દેવદેવેશ લોકનાથ જગત્પ્રભો ।
શોકાકુલાનાં લોકાનાં કેન રક્ષા ભવેદ્ધ્રુવમ્ ॥ ૨॥

સઙ્ગ્રામે સઙ્કટે ઘોરે ભૂતપ્રેતાદિકે ભયે ।
દુઃખદાવાગ્નિસન્તપ્તચેતસાં દુઃખભાગિનામ્ ॥ ૩॥

શ્રીશિવ ઉવાચ -
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ લોકાનાં હિતકામ્યયા ।
વિભીષણાય રામેણ પ્રેમ્ણા દત્તં ચ યત્પુરા ॥ ૪॥

કવચં કપિનાથસ્ય વાયુપુત્રસ્ય ધીમતઃ ।
ગુહ્યં તત્તે પ્રવક્ષ્યામિ વિશેષાચ્છૃણુ સુન્દરિ ॥ ૫॥

ઉદ્યદાદિત્યસઙ્કાશમુદારભુજવિક્રમમ્ ।
કન્દર્પકોટિલાવણ્યં સર્વવિદ્યાવિશારદમ્ ॥ ૬॥

શ્રીરામહૃદયાનન્દં ભક્તકલ્પમહીરુહમ્ ।
અભયં વરદં દોર્ભ્યાં કલયે મારુતાત્મજમ્ ॥ ૭॥

હનુમાનઞ્જનાસૂનુર્વાયુપુત્રો મહાબલઃ ।
રામેષ્ટઃ ફાલ્ગુનસખઃ પિઙ્ગાક્ષોઽમિતવિક્રમઃ ॥ ૮॥

ઉદધિક્રમણશ્ચૈવ સીતાશોકવિનાશનઃ ।
લક્ષ્મણપ્રાણદાતા ચ દશગ્રીવસ્ય દર્પહા ॥ ૯॥

એવં દ્વાદશ નામાનિ કપીન્દ્રસ્ય મહાત્મનઃ ।

સ્વાપકાલે પ્રબોધે ચ યાત્રાકાલે ચ યઃ પઠેત્ ॥ ૧૦॥

તસ્ય સર્વભયં નાસ્તિ રણે ચ વિજયી ભવેત્ ।
રાજદ્વારે ગહ્વરે ચ ભયં નાસ્તિ કદાચન ॥ ૧૧॥

ઉલ્લઙ્ઘ્ય સિન્ધોઃ સલિલં સલીલં યઃ શોકવહ્નિં જનકાત્મજાયાઃ ।
આદાય તેનૈવ દદાહ લઙ્કાં નમામિ તં પ્રાજ્જલિરાઞ્જનેયમ્ ॥ ૧૨॥

ૐ નમો હનુમતે સર્વગ્રહાન્ ભૂતભવિષ્યદ્વર્તમાનાન્ સમીપસ્થાન્
સર્વકાલદુષ્ટબુદ્ધીનુચ્ચાટય પરબલાન્ ક્ષોભય મમ સર્વકાર્યાણિ સાધય સાધય ।
ૐ હ્રાં હ્રૌં હું ફટ । ઘે ઘે ઘે ૐ શિવસિદ્ધમ્ ।
ૐ હ્રાં ૐ હ્રીં ૐ હ્રૂં ૐ હ્રૈં ૐ હ્રૌં ૐ હ્રઃસ્વાહા ।
પરકૃતયન્ત્રમન્ત્રતન્ત્રપરાપકારભૂતપ્રેતપિશાચદૃષ્ટિસવ
વિઘ્નદુર્જનચેષ્ટાકુવિદ્યાસર્વોગ્રભયાનિ નિવારય નિવારય બન્ધ બન્ધ,
લુણ્ઠ લુણ્ઠ વિલુઞ્ચ વિલુઞ્ચ કિલિ કિલિ કિલિ સર્વકુયન્ત્રાણિ
દુષ્ટવાચં ૐ ફટ સ્વાહા ।
ૐ અસ્ય શ્રીહનુમત્કવચસ્તોત્રમન્ત્રસ્ય શ્રીરામચન્દ્ર ઋષિઃ ।
શ્રીહનુમાન્ પરમાત્મા દેવતા । અનુષ્ટુપ્છન્દઃ । મારુતાત્મજ ઇતિ બીજમ્ ।
અઞ્જનાસૂનુરિતિ શક્તિઃ । લક્ષ્મણપ્રાણદાતેતિ કીલકમ્ । રામદૂતાયેત્યસ્ત્રમ્ ।
હનુમાન્ દેવતા ઇતિ કવચમ્ । પિઙ્ગાક્ષોઽમિતવિક્રમ ઇતિ મન્ત્રઃ ।
શ્રીરામચન્દ્રપ્રેરણયા રામચન્દ્રપ્રીત્યર્થં મમ સકલકામનાસિદ્ધ્યર્થં
જપે વિનિયોગઃ ।
અથ અઙ્ગુલિન્યાસઃ ।
ૐ હ્રાં અઞ્જનાસુતાય અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં રુદ્રમૂર્તયે તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં રામદૂતાય મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં વાયુપુત્રાય અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં અગ્નિગર્ભાય કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ બ્રહ્માસ્ત્રનિવારણાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અઙ્ગન્યાસઃ ।
ૐ હ્રાં અઞ્જનાસુતાય હૃદયાય નમઃ ।
ૐ હ્રીં રુદ્રમૂર્તયે શિરસે સ્વાહા ।
ૐ હ્રૂં રામદૂતાય શિખાયૈ વષટ્ ।

ૐ હ્રૈં વાયુપુત્રાય કવચાય હું ।
ૐ હ્રૌં અગ્નિગર્ભાય નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ બ્રહ્માસ્ત્રનિવારણાય અસ્ત્રાય ફટ્ ।
ભૂર્ભુવઃસુવરોમિતિ દિગ્બન્ધઃ ॥

અથ ધ્યાનમ્ ।
ધ્યાયેદ્બાલદિવાકરદ્યુતિનિભં દેવારિદર્પાપહં
દેવેન્દ્રપ્રમુખં પ્રશસ્તયશસં દેદીપ્યમાનં રુચા ।
સુગ્રીવાદિસમસ્તવાનરયુતં સુવ્યક્તતત્ત્વપ્રિયં
સંરક્તારુણલોચનં પવનજં પીતામ્બરાલઙ્કૃતમ્ ॥ ૧॥

ઉદ્યન્માર્તાણ્ડકોટિપ્રકટરુચિયુતં ચારુવીરાસનસ્થં
મૌઞ્જીયજ્ઞોપવીતાભરણરુચિશિખં શોભિતં કુણ્ડલાઙ્ગમ્ ।
ભક્તાનામિષ્ટદં તં પ્રણતમુનિજનં વેદનાદપ્રમોદં
ધ્યાયેદેવં વિધેમં પ્લગકુલપતિં ગોષ્પદીભૂતવાર્ધિમ્ ॥ ૨॥

વજ્રાઙ્ગં પિઙ્ગકેશાઢ્યં સ્વર્ણકુણ્ડલમણ્ડિતમ્ ।
નિગૂઢમુપસઙ્ગમ્ય પારાવારપરાક્રમમ્ ॥ ૩॥

સ્ફટિકાભં સ્વર્ણકાન્તિં દ્વિભુજં ચ કૃતાઞ્જલિમ્ ।
કુણ્ડલદ્વયસંશોભિમુખામ્ભોજં હરિં ભજે ॥ ૪॥

સવ્યહસ્તે ગદાયુક્તં વામહસ્તે કમણ્ડલુમ્ ।
ઉદ્યદ્દક્ષિણદોર્દણ્ડં હનુમન્તં વિચિન્તયેત્ ॥ ૫॥

અથ મન્ત્રઃ ।
Oન્નમો હનુમતે શોભિતાનનાય યશોઽલઙ્કૃતાય અઞ્જનીગર્ભસમ્ભૂતાય
રામલક્ષ્મણાનન્દકાય કપિસૈન્યપ્રકાશનપર્વતોત્પાટનાય સુગ્રીવસાહ્યકરણપરોચ્ચાટનકુમારબ્રહ્મચર્યગમ્ભીરશબ્દોદાય
હ્રીં સર્વદુષ્ટગ્રહનિવારણાય સ્વાહા ।
Oન્નમો હનુમતે એહિ એહિ એહિ
સર્વગ્રહભૂતાનાં શાકિનીડાકિનીનાં વિષમદુષ્ટાનાં
સર્વેષામાકર્ષયાકર્ષય । મર્દય મર્દય । છેદય છેદય ।
મર્ત્યાન્ મારય મારય । શોષય શોષય । પ્રજ્વલ પ્રજ્વલ ।
ભૂતમણ્ડલપિશાચમણ્ડલનિરસનાય ।
ભૂતજ્વર-પ્રેતજ્વર-ચાતુર્થિકજ્વર-બ્રહ્મરાક્ષસ-પિશાચછેદનક્રિયા-
વિષ્ણુજ્વર-મહેશજ્વરાન્ છિન્ધિ છિન્ધિ । ભિન્ધિ ભિન્ધિ ।

અક્ષિશૂલે શિરોઽભ્યન્તરે હ્યક્ષિશૂલે ગુલ્મશૂલે
પિત્તશૂલે બ્રહ્મરાક્ષસકુલપ્રબલનાગકુલવિષં નિર્વિષં કુરુ ઝટિતિઝટિતિ ।
ૐ હ્રીં ફટ્ ઘે ઘે સ્વાહા ।
ૐ નમો હનુમતે પવનપુત્ર વૈશ્વાનરમુખ પાપદૃષ્ટિહનુમતેકો
આજ્ઞાફુરે સ્વાહા ।
સ્વગૃહે દ્વારે પટ્ટકે તિષ્ઠ તિષ્ઠેતિ તત્ર રોગભયં રાજકુલભયં નાસ્તિ,
તસ્યોચ્ચારણમાત્રેણ સર્વે જ્વરા નશ્યન્તિ ।
ૐ હ્રાં હ્રીં હૂં ફટ્ ઘે ઘે સ્વાહા ।
શ્રીરામચન્દ્ર ઉવાચ-
હનુમાન્ પૂર્વતઃ પાતુ દક્ષિણે પવનાત્મજઃ ।
પાતુ પ્રતીચ્યાં રક્ષોઘ્નઃ પાતુ સાગરપારગઃ ॥ ૧॥

ઉદીચ્યામૂર્ધ્વતઃ પાતુ કેસરીપ્રિયનન્દનઃ ।
અધસ્તુ વિષ્ણુભક્તસ્તુ પાતુ મધ્યં ચ પાવનિઃ ॥ ૨॥

લઙ્કાવિદાહકઃ પાતુ સર્વાપદ્ભ્યો નિરન્તરમ્ ।
સુગ્રીવસચિવઃ પાતુ મસ્તકં વાયુનન્દનઃ ॥ ૩॥

ભાલં પાતુ મહાવીરો ભ્રુવોર્મધ્યે નિરન્તરમ્ ।
નેત્રે છાયાપહારી ચ પાતુ નઃ પ્લવગેશ્વરઃ ॥ ૪॥

કપોલે કર્ણમૂલે ચ પાતુ શ્રીરામકિઙ્કરઃ ।
નાસાગ્રમઞ્જનાસૂનુઃ પાતુ વક્ત્રં હરીશ્વરઃ ॥

વાચં રુદ્રપ્રિયઃ પાતુ જિહ્વાં પિઙ્ગલલોચનઃ ॥ ૫॥

પાતુ દેવઃ ફાલ્ગુનેષ્ટઃ ચિબુકં દૈત્યદર્પહા ।
પાતુ કણ્ઠં ચ દૈત્યારિઃ સ્કન્ધૌ પાતુ સુરાર્ચિતઃ ॥ ૬॥

ભુજૌ પાતુ મહાતેજાઃ કરૌ ચ ચરણાયુધઃ ।
નખાન્ નખાયુધઃ પાતુ કુક્ષૌ પાતુ કપીશ્વરઃ ॥ ૭॥

વક્ષો મુદ્રાપહારી ચ પાતુ પાર્શ્વે ભુજાયુધઃ ।
લઙ્કાવિભઞ્જનઃ પાતુ પૃષ્ઠદેશે નિરન્તરમ્ ॥ ૮॥

નાભિં ચ રામદૂતસ્તુ કટિં પાત્વનિલાત્મજઃ
ગુહ્યં પાતુ મહાપ્રાજ્ઞો લિઙ્ગં પાતુ શિવપ્રિયઃ ॥ ૯॥

ઊરૂ ચ જાનુની પાતુ લઙ્કાપ્રાસાદભઞ્જનઃ ।

જઙ્ઘે પાતુ કપિશ્રેષ્ઠો ગુલ્ફૌ પાતુ મહાબલઃ ।
અચલોદ્ધારકઃ પાતુ પાદૌ ભાસ્કરસન્નિભઃ ॥ ૧૦॥

અઙ્ગાન્યમિતસત્ત્વાઢ્યઃ પાતુ પાદાઙ્ગુલીંસ્તથા ।
સર્વાઙ્ગાનિ મહાશૂરઃ પાતુ રોમાણિ ચાત્મવિત્ ॥ ૧૧॥

હનુમત્કવચં યસ્તુ પઠેદ્વિદ્વાન્ વિચક્ષણઃ ।
સ એવ પુરુષશ્રેષ્ઠો ભુક્તિં મુક્તિં ચ વિન્દતિ ॥ ૧૨॥

ત્રિકાલમેકકાલં વા પઠેન્માસત્રયં નરઃ ।
સર્વાન્ રિપૂન્ ક્ષણાજ્જિત્વા સ પુમાન્ શ્રિયમાપ્નુયાત્ ॥ ૧૩॥

મધ્યરાત્રૌ જલે સ્થિત્વા સપ્તવારં પઠેદ્યદિ ।
ક્ષયાપસ્મારકુષ્ઠાદિ તાપત્રયનિવારણમ્ ॥ ૧૪॥

અશ્વત્થમૂલેઽર્કવારે સ્થિત્વા પઠતિ યઃ પુમાન્ ।
અચલાં શ્રિયમાપ્નોતિ સઙ્ગ્રામે વિજયં તથા ॥ ૧૫॥

બુદ્ધિર્બલં યશો ધૈર્યં નિર્ભયત્વમરોગતામ્ ।
સુદાર્ઢ્ય વાક્સ્ફુરત્વં ચ હનુમત્સ્મરણાદ્ભવેત્ ॥ ૧૬॥

મારણં વૈરિણાં સદ્યઃ શરણં સર્વસમ્પદામ્ ।
શોકસ્ય હરણે દક્ષં વન્દે તં રણદારુણમ્ ॥ ૧૭॥

લિખિત્વા પૂજયેદ્યસ્તુ સર્વત્ર વિજયી ભવેત્ ।
યઃ કરે ધારયેન્નિત્યં સ પુમાન્ શ્રિયમાપ્નુયાત્ ॥ ૧૮॥

સ્થિત્વા તુ બન્ધને યસ્તુ જપં કારયતિ દ્વિજૈઃ ।
તત્ક્ષણાન્મુક્તિમાપ્નોતિ નિગડાત્તુ તથૈવ ચ ॥ ૧૯॥

ઈશ્વર ઉવાચ -
ભાન્વિન્દોશ્ચરણારવિન્દયુગલં કૌપીનમૌઞ્જીધરં
કાઞ્ચિશ્રેણિધરં દુકૂલવસનં યજ્ઞોપવીતાજિનમ્ ।
હસ્તાભ્યાં ધૃતપુસ્તકં ચ વિલસદ્ધારાવલિં કુણ્ડલં
યશ્ચાલં વિશિખં પ્રસન્નવદનં શ્રીવાયુપુત્રં ભજે ॥ ૨૦॥

યો વારાન્નિધિમલ્પપલ્બલમિવોલ્લઙ્ઘ્ય પ્રતાપાન્વિતો
વૈદેહીઘનશોકતાપહરણો વૈકુણ્ઠભક્તપ્રિયઃ ।
અક્ષાદ્યાર્જિતરાક્ષસેશ્વરમહાદોષહારી રણે

સોઽયં વાનરપુઙ્ગવોઽવતુ સદા યોઽસ્માન્સમીરાત્મજઃ ॥ ૨૧॥

વજ્રાઙ્ગં પિઙ્ગનેત્રં કનકમયલસત્કુણ્ડલાક્રાન્તગણ્ડં
દમ્ભોલિસ્તમ્ભસારં પ્રહરણસુવશીભૂતરક્ષોઽધિનાથમ્ ।
ઉદ્યલ્લાઙ્ગૂલસપ્તપ્રચલચલધરં ભીમમૂર્તિં કપીન્દ્રં
ધ્યાયેત્તં રામચન્દ્રં ભ્રમરદૃઢકરં સત્ત્વસારં પ્રસન્નમ્ ॥ ૨૨॥

વજ્રાઙ્ગં પિઙ્ગનેત્રં કનકમયલસત્કુણ્ડલૈઃ શોભનીયં
સર્વાપીડ્યાદિનાથં કરતલવિધૃતં પૂર્ણકુમ્ભં દૃઢં વા ।
ભક્તાનામિષ્ટકારં વિદધતિ ચ સદા સુપ્રસન્નં હરાંશં
ત્રૈલોક્યત્રાતુકામં સકલભુવિ ગતં રામદૂતં નમામિ ॥ ૨૩॥

વામે કરે વૈરિભિદં વહન્તં શૈલં પરં શૃઙ્ખલહારકણ્ઠમ્ ।
દધાનમાચ્છાદ્ય સુપર્ણવર્ણં ભજે જ્વલત્કુણ્ડલમાઞ્જનેયમ્ ॥ ૨૪॥

પદ્મરાગમણિકુણ્ડલત્વિષા પાટલીકૃતકપોલમણ્ડલમ્ ।
દિવ્યદેહકદલીવનાન્તરે ભાવયામિ પવમાનનન્દનમ્ ॥ ૨૫॥

યત્ર યત્ર રઘુનાથકીર્તનં તત્ર તત્ર કૃતમસ્તકાઞ્જલિમ્ ।
વાષ્પવારિપરિપૂર્ણલોચનં મારુતિં નમત રાક્ષસાન્તકમ્ । ૨૬॥

મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજં વાનરયૂથમુખ્યં શ્રીરામદૂતં શિરસા નમામિ ॥ ૨૭॥

વિવાદે દિવ્યકાલે ચ દ્યૂતે રાજકુલે રણે ।
દશવારં પઠેદ્રાત્રૌ મિતાહારો જિતેન્દ્રિયઃ ॥ ૨૮॥

વિજયં લભતે લોકે માનવેષુ નરેષુ ચ ।
ભૂતે પ્રેતે મહાદુર્ગેઽરણ્યે સાગરસમ્પ્લવે । ૨૯॥

સિંહવ્યાઘ્રભયે ચોગ્રે શરશસ્ત્રાસ્ત્રપાતને ।
શૃઙ્ખલાબન્ધને ચૈવ કારાગૃહનિયન્ત્રણે ॥ ૩૦॥

કોપે સ્તમ્ભે વહ્નિચક્રે ક્ષેત્રે ઘોરે સુદારુણે ।
શોકે મહારણે ચૈવ બ્રહ્મગ્રહનિવારણમ્ ॥ ૩૧॥

સર્વદા તુ પઠેન્નિત્યં જયમાપ્નોતિ નિશ્ચિતમ્ ।
ભૂર્જે વા વસને રક્તે ક્ષૌમે વા તાલપત્રકે ॥ ૩૨॥

ત્રિગન્ધિના વા મષ્યા વા વિલિખ્ય ધારયેન્નરઃ ।

પઞ્ચસપ્તત્રિલોહૈર્વા ગોપિતઃ સર્વતઃ શુભમ્ ॥ ૩૩॥

કરે કટ્યાં બાહુમૂલે કણ્ઠે શિરસિ ધારિતમ્ ।
સર્વાન્કામાનવાપ્નોતિ સત્યં શ્રીરામભાષિતમ્ ॥ ૩૪॥

અપરાજિત નમસ્તેઽસ્તુ નમસ્તે રામપૂજિત ।
પ્રસ્થાનં ચ કરિષ્યામિ સિદ્ધિર્ભવતુ મે સદા ॥ ૩૫॥

ઇત્યુક્ત્વા યો વ્રજેદ્ગ્રામં દેશં તીર્થાન્તરં રણમ્ ।
આગમિષ્યતિ શીઘ્રં સ ક્ષેમરૂપો ગૃહં પુનઃ ॥ ૩૬॥

ઇતિ વદતિ વિશેષાદ્રાઘવે રાક્ષસેન્દ્રઃ
    પ્રમુદિતવરચિત્તો રાવણસ્યાનુજો હિ ।
રઘુવરપદપદ્મં વન્દયામાસ ભૂયઃ
    કુલસહિતકૃતાર્થઃ શર્મદં મન્યમાનઃ ॥ ૩૭॥

તં વેદશાસ્ત્રપરિનિષ્ઠિતશુદ્ધબુદ્ધિં
    શર્મપ્રદં સુરમુનીન્દ્રનુતં કપીન્દ્રમ્ ।
કૃષ્ણત્વચં કનકપિઙ્ગજટાકલાપં
    વ્યાસં નમામિ શિરસા તિલકં મુનીનામ્ ॥ ૩૮॥

ય ઇદં પ્રાતરુત્થાય પઠેત કવચં સદા ।
આયુરારોગ્યસન્તાનૈસ્તસ્ય સ્તવ્યઃ સ્તવો ભવેત્ ॥ ૩૯॥

એવં ગિરીન્દ્રજે શ્રીમદ્ધનુમત્કવચં શુભમ્ ।
ત્વયા પૃષ્ટં મયા પ્રીત્યા વિસ્તરાદ્વિનિવેદિતમ્ ॥ ૪૦॥

શ્રીરામદાસ ઉવાચ -
એવં શિવમુખાચ્છ્રુત્વા પાર્વતી કવચં શુભમ્ ।
હનૂમતઃ સદા ભક્ત્યા પપાઠ તન્મનાઃ સદા ॥ ૪૧॥

એવં શિષ્ય ત્વયાઽપ્યત્ર યથા પૃષ્ટં તથા મયા ।
હનુમત્કવચં ચેદં તવાગ્રે વિનિવેદિતમ્ ॥ ૪૨॥

ઇદં પૂર્વં પઠિત્વા તુ રામસ્ય કવચં તતઃ ।
પઠનીયં નરૈર્ભક્ત્યા નૈકમેવ પઠેત્કદા ॥ ૪૩॥

હનુમત્કવચં ચાત્ર શ્રીરામકવચં વિના ।
યે પઠન્તિ નરાશ્ચાત્ર પઠનં તદ્વૃથા ભવેત્ ॥ ૪૪॥

તસ્માત્સર્વૈઃ પઠનીયં સર્વદા કવચદ્વયમ્ ।
રામસ્ય વાયુપુત્રસ્ય સદ્ભક્તૈશ્ચ વિશેષતઃ ॥ ૪૫॥

ઇતિ શ્રીશતકોટિરામચરિતાન્તર્ગત શ્રીમદાનન્દરામાયણે
વાલ્મિકીયે મનોહરકાણ્ડે ત્રયોદશસર્ગાતર્ગતં શ્રીહનુમત્કવચં
સમ્પૂર્ણમ્ ॥

હનુમત્-લક્ષ્મણ-સીતા-રામ-ભરત-શત્રુઘ્ન
ષટ્ કવચાનિ પઠનીયમ્ ।
ષટ્ કવચાનિ પઠિતું અશક્તશ્ચેત્
હનુમત્-લક્ષ્મણ-સીતા-રામ –
અથવા હનુમત્-સીતા-રામ
અથવા હનુમત્-રામ / સીતા-રામ કવચાનિ ।
અથવા શ્રીરામકવચમેવ પઠનીયમ્ ॥

All the six kavachas
hanumat-lakShmaNa-sItA-rAma-bharata-shatrughna
from AnandarAmAyaNa should be recited together.
If one is unable to recite all the six,
then he/she can recite in the decreasing order
hanumat-lakShmaNa-sItA-rAma
hanumat-sItA-rAma
hanumat-rAma
sItA-rAma
If this is not possible, then one should at least
recite Shri Rama Kavacham.

Encoded by Antaratma antaratma at Safe-mail.net
Proofread by Antaratma, PSA Easwaran

*Shri Hanumat Kavacham*

pdf was typeset on May 28, 2021

Please send corrections to *sanskrit@cheerful.com*